# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 4 | गुणाः – ५० |
| विषयः – प्राच्यार्थशास्त्रम् एवं राजनीतिशास्त्रम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – शुक्रनीतिः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्या कार्या।**

१ अतः सदानीतिशास्त्रमभ्यसेद्यत्नतो नृपः।
यद्विज्ञनान्नृपाद्याश्च शत्रुजिल्लोकरञ्जिकाः॥

२ देहादीनां नश्वरत्वं वेदान्तैर्न विना हि किम्।
स्वस्वाभिमतबोधीनि शास्त्राण्येतानि सन्ति हि॥

३ आचार-प्रेरको राजा ह्येतत्कालस्य कारणम्।
यदि कालः प्रमाणं हि कस्माद्धर्मोऽस्ति कर्तृषु॥

**प्रश्नः २ धर्मस्य प्रशंसां विलिख्य राज्ञः गुणदोषाणां निर्देशं लिखत।**

**प्रश्नः ३ विनाशस्य चतुर्णां कारणानां विमर्शं कुरुत।**

**प्रश्नः ४ कयोरपि द्वयोः व्याख्या कार्या।**

१ जितेन्द्रियस्य नृपतेर्नीतिशास्त्रानुसारिणः।
भवन्त्युच्चलिता लक्ष्म्यः कीर्तयन्ति नभःस्पृशः॥

२ अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्र–पुराणानि त्रयीदं सर्वमुच्यते॥

३ प्रणिपातेन हि गुरून् सतोऽनूचानचेष्टितैः।
कुर्वीताभिमुखान्देवान् भूत्यै सुकृतकर्मणाम्॥

**प्रश्नः ५ ‘आन्विक्षिकी’ इत्यादयः चतस्रः विद्याः सविस्तरं प्रतिपादयत।**

**प्रश्नः ६ भूमिमानभेदानां निर्देशः यथाग्रन्थं चर्चयत।**

**प्रश्नः ७ कयोरपि द्वयोः व्याख्या कार्या ।**

१ कूर्मपृष्ठा मार्गभूमिः कार्या ग्राम्यैः सुसेतुका ।
कुर्यान्मार्गान्पार्श्वखातान्निर्गमार्थं जलस्य च ॥

२ गृहपङ्क्तिमुखे द्वारं कर्तव्यं यामिकैः सदा ।
तैस्तद्वृत्तं तु शृणुयाद् गृहस्थभृतिपोषितैः ॥

३ लिखित्वा शासनं राजा धारयेत चतुष्पथे ।
सदा चोद्यतदण्डः स्यादसाधुषु च शत्रुषु ॥

**प्रश्नः ८ राज्ञः दैनिक-कृत्यानि विलिख्य तेषां कर्तव्यानि विवर्ण्यताम् ।**

**प्रश्नः ९ राज्ञः आदेश-घोषणां स्वगिरया प्रस्तूयताम् ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ शुक्रनीतेः कर्ता कः ?
२ सात्विकः राजा कस्यांशं भुङ्क्ते ?
३ के पौरुषं महत् मन्यन्ते ?
४ ग्रन्थाधारेण राज्ञः कति अङ्गानि ?
५ नीतेः मूलः कः ?
६ कानि षट् चञ्चलानि ?
७ केषां षड्वर्गे समाहारः क्रियते ?
८ सनातनी विद्या का ?
९ चतुः करात्मको दण्डः कः कथ्यते ?
१० दमः इत्यस्य कोऽर्थः ?
११ उत्तमराजमार्गस्य किं परिमाणम् ?
१२ युद्धानुकूलव्यापारः अर्थात् किम् ?
१३ महापदि नृपः सदः कं संश्रयेत् ?
१४ प्रथमाध्याये आहत्य कति श्लोकाः ?
१५ प्रकृति-निर्मित-द्रव्यादि कति पदार्थाः ?

****